# विभक्तिः अभ्यासपत्राणि

## १५ – ०२.०४.२०१६

व्योम-संस्कृत-पाठशाला

www.sanskritfromhome.in

# अभ्यासः - १



- एषः कः?
- किं करोति?
- किं धरति?
- कीदृशं पुस्तकम्?
- पुस्तकं केन गृह्णाति?

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – १ - उत्तराणि



- एषः बालः।
- बालः पुस्तकं पठति।
- बालः उपनेत्रं धरति।
- पुस्तकं रक्तम् अस्ति।
- पुस्तकं हस्ताभ्यां गृह्णाति।

# अभ्यासः - १



- एषा का?
- किं करोति?
- कथं नृत्यति?

# अभ्यासः - १ - उत्तराणि



- एषा बालिका।
- बालिका नृत्यति।
- बालिका सन्तोषेण/आनन्देन/हर्षेण नृत्यति।

# अभ्यासः - १



- एते के?
- किं कुर्वन्ति?
- कथं धावन्ति?

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १- उत्तराणि



- एते अश्वाः।
- अश्वाः धावन्ति।
- अश्वाः वेगेन धावन्ति।

# अभ्यासः - १



- एषः कः?
- किं करोति?
- केन लिखति?

# अभ्यासः – १ - उत्तराणि



- एषः पुरुषः।
- पुरुषः लिखति।
- पुरुषः लेखन्या लिखति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - २

- (एतद्) ग्रामः। ग्रामः (सुन्दर) अस्ति। ग्रामे २०० (जन) वसन्ति। (तत्) जनाः कृषिकार्यं कुर्वन्ति। कृषिकार्ये साहाय्यार्थं धेनूः (वृषभ) च पालयन्ति। (ग्राम) परितः तेषां (क्षेत्र) सन्ति। समीपे एव नदी प्रवहति। नद्याः (जल) विना सस्यानि न रोहन्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – २ - उत्तराणि

एषः ग्रामः। ग्रामः सुन्दरः अस्ति। ग्रामे २०० जनाः वसन्ति। ते जनाः कृषिकार्यं कुर्वन्ति। कृषिकार्यें साहाय्यार्थं धेनूः वृषभान् च पालयन्ति। ग्रामं परितः तेषां क्षेत्राणि सन्ति। समीपे एव नदी प्रवहति। नद्याः जलं विना सस्यानि न रोहन्ति।

# अभ्यासः - २

- वयं छात्राः। (अस्मद्) सम्यक् अध्ययनं कर्तव्यम्। पाठाः (श्रद्धा) (पठितव्य)। गुरुसेवा (करणीय)। (छात्र) आलस्यं न (प्रदर्शनीय)। धर्मः (पालनीय)। विद्या (अभ्यसनीय)। सत्यमेव (वक्तव्य), न कदाचित् असत्यम्।

# अभ्यासः – २ - उत्तराणि

वयं छात्राः। अस्माभिः सम्यक् अध्ययनं कर्तव्यम्। पाठाः श्रद्धया पठितव्याः। गुरुसेवा करणीया। छात्रैः आलस्यं न प्रदर्शनीयम्। धर्मः पालनीयः। विद्या अभ्यसनीया। सत्यमेव वक्तव्यम्, न कदाचित् असत्यम्।

# अभ्यासः - २

- कैकेयी (दशरथ) (वरद्वय) पृच्छति। पितुः (आज्ञा) पालयन् रामः (वन) गच्छति। (राम) सह सीता, लक्ष्मणश्च वनं (गम्)। (तत्) त्रयः पञ्चवट्यां वासं कुर्वन्ति। तत्र (शूर्पणखा) रामः (दृष्ट)। शूर्पणखा (सीता) हत्वा (राम) प्राप्तुम् इच्छति। लक्ष्मणः (कोप) शूर्पणखायाः (नासिका) (कर्ण-२) च कर्तयति।

# अभ्यासः – २ - उत्तराणि

- कैकेयी दशरथं वरद्वयं पृच्छति। पितुः आज्ञां पालयन् रामः वनं गच्छति। रामेण सह सीता, लक्ष्मणश्च वनं गच्छतः। ते त्रयः पञ्चवट्यां वासं कुर्वन्ति। तत्र शूर्पणखया रामः दृष्टः। शूर्पणखा सीतां हत्वा रामं प्राप्तुम् इच्छति। लक्ष्मणः कोपेन शूर्पणखायाः नासिकां कर्णौ च कर्तयति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ३

## वाक्यरचना (सर्वेषु वचनेषु)

वस्त्रम्

सः बालकः

चीराणि त्वं तापसी

सा बालिका शाटिका

राजा

पदवी अहं सज्जनः

तत् मित्रम् हारः

अश्वाः एतत् कुटुम्बम्

एषः विप्रः गृहम्

एषा कर्मकरी

नाणकानि

# अभ्यासः – ३ - उत्तराणि

## वाक्यरचना (सर्वेषु वचनेषु)

- राजा तस्मै बालकाय/ताभ्यां बालकाभ्यां/तेभ्यः बालकेभ्यः वस्त्रं दत्तवान्।
- राजा तस्यै बालिकायै/ताभ्यां बालिकाभ्यां/ताभ्यः बालिकाभ्यः शाटिकां दत्तवान्।
- राजा तस्मै मित्राय/ताभ्यां मित्राभ्यां/तेभ्यः मित्रेभ्यः हारं दत्तवान्।
- राजा एतस्मै विप्राय/एताभ्यां विप्राभ्याम्/एतेभ्यः विप्रेभ्यः गृहं दत्तवान्।
- राजा एतस्यै कर्मकर्यै/एताभ्यां कर्मकरीभ्याम्/एताभ्यः कर्मकरीभ्यः नाटकानि दत्तवान्।
- राजा एतस्मै कुटुम्बाय/एताभ्यां कुटुम्बाभ्याम्/एतेभ्यः कुटुम्बेभ्यः अश्वान् दत्तवान्।
- राजा मह्यं सज्जनाय/आवाभ्यां सज्जनाभ्याम्/अस्मभ्यं सज्जनेभ्यः पदवीं दत्तवान्।
- राजा तुभ्यं तापस्यै/युवाभ्यां तापसीभ्याम्/युष्मभ्यं तापसीभ्यः फलं दत्तवान्।

# अभ्यासः – ४ (न रोचते)

- रामः – असत्यम्
- अर्जुनः – युद्धम्
- गिरिजा – गङ्गा
- देवाः – असुराः
- असुराः – सत्कार्याणि
- नारायणः - अधर्मः
- ते – हिंसा
- वयम् – आलस्यम्
- सा – प्रेतकथाः
- एताः – शाकानि
- त्वम् – एते
- एषः - अहम्

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ४ (न रोचते) - उत्तराणि

- रामाय असत्यं न रोचते।
- अर्जुनाय युद्धं न रोचते।
- गिरिजायै गङ्गा न रोचते।
- देवेभ्यः असुराः न रोचन्ते।
- असुरेभ्यः सत्कार्याणि न रोचन्ते।
- नारायणाय अधर्मः न रोचते।
- तस्मै हिंसा न रोचते।
- अस्मभ्यम् आलस्यं न रोचते।
- तस्यै प्रेतकथाः न रोचन्ते।
- एताभ्यः शाकानि न रोचन्ते।
- तुभ्यम् एते न रोचन्ते।
- एतस्मै अहं न रोचे।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ५ (क्रुधादयः)


सुरेशः
क्रुध्
गोविन्दः
द्रुह्
शङ्करः
ईर्ष्य्
महेशः
असूय्
गिरिजा
ईर्ष्य्
माधवी
क्रुध्
मोहनः
असूय्
वाणी
द्रुह्
रमा
क्रुध्
रमेशः
असूय्
गङ्गा
द्रुह्
गायत्री
ईर्ष्य्
आनन्दः

# अभ्यासः – ५ (क्रुधादयः) - उत्तराणि

- सुरेशः गोविन्दाय क्रुध्यति।
- गोविन्दः शङ्कराय द्रुह्यति।
- शङ्करः महेशाय ईर्ष्यति।
- महेशः गिरिजायै असूयति।
- गिरिजा माधव्यै ईर्ष्यति।
- माधवी मोहनाय क्रुध्यति।
- मोहनः वाण्यै असूयति।
- वाणी रमायै द्रुह्यति।
- रमा रमेशाय क्रुध्यति।
- रमेशः गङ्गायै असूयति।
- गङ्गा गायत्र्यै द्रुह्यति।
- गायत्री आनन्दाय ईर्ष्यति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ६ (नमः)

- श्रीरामः
- रामभद्रः
- रामचन्द्रः
- रघुनाथः
- सीताकान्तः
- हनुमत्प्रियः

- रमा
- ललिता
- गङ्गा
- गिरिजा
- दुर्गा
- सीता

- सरस्वती
- पार्वती
- वाणी
- लक्ष्मीः
- गौरी
- काली

- देवाः
- देव्यः
- ब्राह्मणाः
- सज्जनाः
- ऋषिवराः
- शास्त्रकाराः

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ६ (नमः) - उत्तराणि

| | | | |
|---|---|---|---|
| श्रीरामाय | रमायै | सरस्वत्यै | देवेभ्यः |
| रामभद्राय | ललितायै | पार्वत्यै | देवीभ्यः |
| रामचन्द्राय | गङ्गायै | वाण्यै | ब्राह्मणेभ्यः |
| रघुनाथाय | गिरिजायै | लक्ष्म्यै | सज्जनेभ्यः |
| सीताकान्ताय | दुर्गायै | गौर्यै | ऋषिवरेभ्यः |
| हनुमत्प्रियाय | सीतायै | काल्यै | शास्त्रकारेभ्यः |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |